संस्कृतवार्ता:

13.03.2024

सायम् - 06:20

## मुख्यवार्ता:

· प्रधानमन्त्री नरेन्द्रमोदी तिसृणां अर्धचालक-परियोजनानां शिलान्यासं कृतवान्। अभिव्यक्तवान् च यत् भारतं अग्रिमेषु दिवसेषु अर्धचालक-विनिर्माण-क्षेत्रे वैश्विकरूपेण अग्रगण्यं भविष्यति।

· केन्द्रेण त्रि-लक्ष-प्रशिक्षु-आवेदनै: सह राष्ट्रिय-कैडेट्-कोर् (एनसीसी) इत्यस्य विस्तारणं अनुमोदितम्।

· अद्य हरियाणाराज्यस्य नवचित: मुख्यमन्त्री नायाब-सिंह-सैनी विश्वासमतम् विजितवान्।

· प्रशासनेन सूचितं यत् प्रतिवर्षं सितम्बरमासस्य सप्तदश दिनाङ्कं 'हैदराबाद-स्वाधीनता-दिवसस्य' रूपेण आचरिष्यते।

· सूचनाप्रसारणमन्त्री अनुरागसिंहठाकुर: अद्य नवदिल्ल्याम् आकाशवाणी-समाचार, डी.डी. न्यूज चेत्येतयो: संशोधित-आन्तर्जालिक पटलानां अनावरणं कृतवान्।

· महिला-क्रिकेट-प्रीमीयर-लीग-इति प्रतिस्पर्धायां अद्य सायं दिल्ल्या: अरूण-जेटली-क्रिकेट-क्रीडांगणे डेल्ही कैपिटल्सदलं गुजरात जायन्ट्स दलं सम्मुखीकरिष्यति।

## प्रधानमन्त्री सेमीकन्डक्टर

प्रधानमन्त्री नरेन्द्रमोदी आशाम् अभिव्यक्तवान् यत् भारतं अग्रिमेषु दिवसेषु अर्धचालक-विनिर्माण-क्षेत्रे वैश्विकरूपेण अग्रगण्यं भविष्यति। अपि च चतुर्थे उद्योगक्षेत्रे अग्रे वर्धितुं सज्जं वर्तते। अद्य असौ दृश्य-श्रव्य-परान्तर्जालीय-माध्यमेन एकं दशमलव पञ्चविंशति: लक्षकोटिरूप्यकाणां तिसृणां अर्धचालक-परियोजनानां शिलान्यासं कृतवान्। एतासु परियोजनासु गुजरात-राज्यस्य धोलेरा-विशेष-निवेश-क्षेत्रे देशस्य प्रथमं वाणिज्यिक-अर्धचालक-केन्द्रं असमस्य मोरीगांवक्षेत्रे बाह्य-स्रोत-अर्धचालक-असेंबली इति परीक्षण-सौविध्यानि गुजरातस्य साणन्दक्षेत्रे बाह्य-स्रोत-परीक्षण-सौविध्यानि च सम्मिलितानि सन्ति। प्रधानमन्त्रिणा निगदितं यत्

अर्धचालक-उद्योगैः युवानः लाभान्विताः भविष्यन्ति। असौ अग्रे निगदितवान् यत् अल्पमूल्यकं विनिर्माणं भारतं आत्मनिर्भरं आधुनिकं च निर्मास्यति। येन हि अस्य देशस्य नवयुवकैः उद्घाटितान् अवसरान् प्रति स्वीयसम्भावनाः अन्वेष्टितव्याः भविष्यन्ति।

प्रधानमनी-सूरज

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रधानमन्त्रि- सामाजिक- उत्थान रोजगार-आधारित- जनकल्याण - पीएम् - सूरज- इत्यस्य राष्ट्रिय पटलस्य अनावरणम् कृतवान् । अपि च ,वञ्चितसमुदायानां एक-लक्ष उद्यमिभ्यः ऋण-साहायताम् अनुमोदितवान् । असौ दृश्य-श्रव्य-परान्तर्जालीय-माध्यमेन अनुसूचितजाति – निम्नवर्ग-स्वच्छ-कार्यकर्तॄन् समेत्य विभिन्नानां सर्वकारीय-योजनानां लाभार्थिभिः सह संवाद विहितवान् । एतस्मिन् कार्यक्रमे देशस्य सप्तत्यधिकचतुश्शतं वंचित-समूहानां विविध- सर्वकारीय- योजनानां प्रायशः त्रि-लक्ष- लाभार्थिनां प्रतिभागिता अवलोकिता। प्रधानमन्त्री च नेशनल-एक्शन फॉर - मैकेनाइज्ड -इति इकोसिस्टम (नमस्ते) इत्याख्यस्य अन्तर्गतं मलजल- शोधन - यन्त्राणां श्रमिकेभ्यः आयुष्मान् - स्वास्थ्य-प्रपत्रं पीपी ई - पुटिकां अपि प्रदत्तवान्।

राजनाथः एनसीसी

रक्षामन्त्रिणा राजनाथसिंहेन राष्ट्रिय-कैडेट्-कोर् (एनसीसी) इत्यस्य विस्तारस्य प्रस्तावस्य अनुमोदनं कृतम् । विज्ञस्यानुसारेण एतत् विस्तारणं देशस्य शैक्षणिक-संस्थानेषु एन-सी-सी इत्यस्य अभ्यर्थनपूरणं अस्ति। मन्त्रालयेन उक्तं यत् विस्तारयोजनायाः एकः महत्त्वपूर्णः पक्षः अस्ति- 'पूर्वसैनिकानां एनसीसी इत्यस्मिन् प्रशिक्षकरूपेण नियोजनम् इति'। तत्र इदमपि उक्तं यत्, एषः उपक्रमः 'अमृत-पीढी' इत्यस्य प्रेरितानां, अनुशासितानां, देशभक्तानाम् च यूनां आधारं विस्तारयिष्यति ये 'विकसित-भारतस्य' लक्ष्यं प्राप्तुं योगदानं दास्यन्ति।

## हरियाणा-प्रशासनं

हरियाणाराज्यस्य नवचित: मुख्यमन्त्री नायाब-सिंह्-सैनी अद्य विश्वासमतम् विजितवान्। असौ साम्प्रतिके समये राजनीतिक-घटनाक्रमस्य अनन्तरं एकस्मिन् विशिष्ट-विधानसभा-सत्रावधौ आयोजिते शक्तिपरीक्षणे अद्य विश्वासमतम् इदमधिगतम्।

## हैदराबाद/स्वाधीनता-दिवसः

गृहमन्त्रालयेन सूचितं यत् प्रतिवर्षं सितम्बरमासस्य सप्तदश दिनाङ्कं 'हैदराबाद-स्वाधीनता-दिवसस्य' रूपेण आचर्यते। निर्गतायां आधिकारिकसूचनायां मन्त्रालयेन उक्तं यत् हैदराबादस्य यूनां मनसि देशभक्तेः भावं संचारयितुं स्वाधीनता-युद्धस्य वीरगतानां सैनिकानां स्मरणार्थं च निर्णयोऽयं स्वीकृत: अस्ति।

## ठाकुर: प्रसार भारती

सूचनाप्रसारणमन्त्री अनुरागसिंहठाकुर: अद्य नवदिल्ल्याम् आकाशावाणी समाचार, डी.डी. न्यूज चेत्येतयो: संशोधित-आन्तर्जालिक पटलानां अनावरणं कृतवान्। श्रीठाकुर: नूतनस्य ए.आई.आर. इति अनुप्रयोगस्य विमोचनमपि कृतवान्। प्रसारणार्थं प्रसार भारत्या विनिमयी कृतस्य श्रव्याङ्कनस्य 'शब्द' इत्येतस्यापि अनावरणं कृतवान्। अत्रावसरे प्रवदन् श्रीठाकुर: अवद् यत् दूरदर्शन-आकाशवाणी इत्येतौ सार्वजनिक-प्रसारकरूपेण अनेकानि वर्षाणि यावत् स्वीयसेवाप्रदानं कृतम्। स्वीय-अन्तर्जालिक-माध्यमेन एतौ प्रसारक-माध्यमकौ देशस्य प्रत्येकस्मिन् कोणे स्थानीयभाषाणां विकासे महत्वपूर्णभूमिकां निभालितवन्तौ। असौ अग्रे अकथयत् प्रसारभारती अधुना समाचार-संघटनेभ्य: विभिन्न-भाषासु श्रव्य-दृश्य-चलच्चित्र-लिखित सामग्रय: उपलब्धा: कारयिष्यन्ति।

भूटान/प्रधान्मन्त्रियात्रा

भूटानदेशीय: प्रधानमन्त्री दाशो-त्शेरिंग-तोबगे इत्येष: श्व: आरभ्य भारतस्य पञ्चदिवसीयात्रायां आयाति। अस्य वर्षस्य जनवरीमासे पदभारग्रहणानन्तरं तस्य इयं प्रथमा वैदेशिकीययात्रा वर्तते। विदेशमन्त्रालयेन कथितं यत् स्वीय-यात्रावधौ भूटानदेशीय: प्रधानमन्त्री राष्ट्रपतिना द्रौपदीमुर्म इत्यनया सह मेलनं करिष्यति, प्रधानमन्त्रिणा च नरेन्द्रमोदिना सह द्वैपाक्षिकवार्तां विधास्यति। भूटानदेशीय: प्रधानमन्त्री शेरिंग-तोबगे इत्येष: मुम्बईनगरं प्रत्यपि गच्छेत्। मन्त्रालयेन कथितं यत् भारत-भूटान-देशयो: सर्वेषु चरणेषु मैत्रीभाव-समन्वययो: विश्वास सद्भावनायो: च पारस्परिक-समन्वये अनुकरणीय-सम्बन्धा: सन्ति। भूटानदेशीयस्य प्रधानमन्त्रिण: इयं यात्रा द्वयोरपि देशयो: सम्बन्धान् इतोऽपि सुदृढीकरिष्यति।

अरूणाचलप्रदेश: भाजपा

अरुणाचलप्रदेशे विधानसभानिर्वाचनस्य सर्वेषां षष्टिः प्रत्याशीनां सूची अद्य भारतीयजनतापार्टीति दलेन प्रकाशिता। मुख्यमन्त्री 'पेमा खाण्डु मुक्तो' विधानसभा निर्वाचनक्षेत्रात् निर्वाचनं करिष्यति। अस्मिन् वर्षे जूनमासस्य द्वितीये दिने वर्तमानराज्यसभायाः कार्यकालः समाप्तः भविष्यति।

महिला-प्रीमीयर-लीग

महिला-क्रिकेट-प्रीमीयर-लीग-इति प्रतिस्पर्धायां अद्य सायं दिल्ल्या: अरूण-जेटली-क्रिकेट-क्रीडांगणे डेल्ही कैपिटल्सदलं गुजरात जायन्ट्स दलं सम्मुखीकरिष्यति। प्रतिस्पर्धाया: अस्या: प्रसारणं सायं सार्ध-सप्तवादनतो भविष्यति। ह्य: जातायां प्रतिस्पर्धायां रॉयल-चैलेन्जर्स-बेंगलुरुदलेन मुम्बई-इण्डियन्सदलं सप्त स्तोभै: पराजितम्।

।। इति वार्ता: ।।